# श्रीसोमनाथसंस्कृतयुनिवर्सिटी, वेरावलम्

## सत्रान्तपरीक्षा – एप्रिल २०१९

| | | |
|---|---|---|
| कक्षा – आचार्यः -1 (SEM-2) | प्रश्नपत्रम्-2 (CC.4.2.4) | गुणाः – ७० |
| विषयः- शुक्लयजुर्वेदः | ग्रन्थः- शुक्लयजुर्वेदीयमाध्यान्दिनसंहितायाः महीधरभाष्यम्। | समयः – 11:00 तः 2:00 |
| दिनाङ्कः – 11/04/2019 | | |

### विभागः १

प्रश्नः १ **निम्नाङ्कितयोः कस्यैकस्य मन्त्रस्य व्याख्या कार्या ।** ०५

(क) सहसा जातान्प्रणुदा नः सपत्नान् प्रत्यजातान् जातवेदो नुदस्व।
अश्विनो ब्रूहि सुमनस्य मानो वयꣳ स्याम प्रुणुदा नः सपत्नान्॥

(ख) ॐ नमः श्वभ्यः श्वपतिभ्यश्च वो नमो नमो भवाय च रुद्राय च नमः शर्वाय
च पशुपतये च नमो नीलग्रीवाय च शितिकण्ठाय च॥

प्रश्नः २ **अधोनिर्दिष्टयोः कस्यैकस्य निबन्धात्मकं वर्णनं कुरुत।** १०

१ पञ्चदशाध्यायस्य चयनमन्त्राणां सारांशः।

२ शतरुद्रीयहोमं (षोडशाध्यायान्तर्गतं) वर्णयत।

### विभागः २

प्रश्नः ३ **अधोनिर्दिष्टयोः कस्याप्येकस्य व्याख्या विधीयताम्।** ०५

(क) ॐ नमो बिल्मने च कवचिने च नमो वर्मिणे च वरुथिने च।
नमः श्रुताय च श्रुतसेनाय च नमो दुन्दुभ्याय च हनन्याय च॥

(ख) ॐ समुद्रस्य त्वा कयाग्ने परिव्ययामसि पावकोऽस्मभ्यꣳ शिवोभव॥

प्रश्नः ४ **कयोश्चिद् द्वयोः एकस्यैव समाधानं विधेयम्।** १०

१ ग्रन्थोक्तभाष्यमतेन रुद्रसूक्तस्य सारांशः प्रस्तूयताम्।

२ अप्रतिरथसूक्तस्येन्द्रसूक्तस्य वा निरूपणं कुरुत।

### विभागः ३

प्रश्नः ५ **निम्नाङ्कितयोः कस्याप्येकस्यैवांशस्य व्याख्या विधीयताम्।** ०५

(क) ॐ स्वर्यन्तो नापेक्षन्त आद्याꣳ रोहन्ति रोदसी यज्ञम्।
ये विश्वतो धारꣳ सुविद्वाꣳ सो वितेनिरे॥

(ख) ॐ पयः पृथिव्यां पय ओषधीषु पयो दिव्यन्तरिक्षे पयो धाः।
पयस्वतीः प्रदिशः सन्तु मह्यम्॥

**प्रश्नः ६ कयोश्चिद् द्वयोः एकस्यैव समाधानं विधेयम्।** १०

१ चित्यारोहणादिमन्त्राणां वर्णनं कुरु।

२ वसोधारादिमन्त्राणाम् अष्टादशाध्यायस्य वर्णनं वर्णयत।

**विभागः ४**

**प्रश्नः ७ अधोनिर्दिष्टयोः कस्याप्येकस्य सूत्रस्य व्याख्या विधीयताम्।** ०५

(क) ॐ इमा रुद्राय तवसे कपर्दिने क्षयद्वीराय प्रभरामहे मतीः।

यथाशमसद्द्विपदे चतुष्पदे विश्वं पुष्टं ग्रामेऽअस्मिन्नातुरम्॥ ।

(ख) ये भूतानामधिपतयो विशिखा सकपर्दिनः ।

तेषाᳬ सहस्रयोजने वधन्वानि तन्मसि॥

**प्रश्नः ८ कयोश्चिद् द्वयोः एकस्यैव समाधानं विधेयम्।** १०

१ वेदे स्वराणां सङ्केतानि प्रदर्श्य स्वरमहत्त्वं प्रतिपादयतु।

२ हस्तहीनं तु योऽधीते स्वरवर्णविवर्जितम् ।

ऋग्यजुःसामभिर्दग्धो वियोनिमधिगच्छति॥

**प्रश्नः ९ अधस्तनेषु दशप्रश्नाः समाधेयाः।** १०

१ केन मन्त्रेण पुरस्तादिष्टकाम् उपदधाति ?

२ शम्भूः शब्दस्य ग्रन्थोक्तदिशा व्याख्या कार्या ?

३ पुञ्जिकस्थला इत्यस्य व्युतपत्तिं कुरु?

४ रुद्रः शब्दस्य व्युत्पत्तिं कुरु ?

५ वृक्षेभ्यो हरिकेशेभ्यः पशुनां पतये नमः। अर्थं लिखतु ?

६ नमो रोहिताय इत्यस्य अर्थं लिखतु?

७ कपर्दः कस्य नामास्ति ?

८ काटयः इत्यस्य अर्थं लिखतु ?

९ वर्चोदाः इत्यस्य शब्दार्थं लिखतु ?

१० संक्रन्दनेन इत्यस्य अर्थं लिखतु ?

११ गार्हपत्यः कस्य नामास्ति ?

१२ विमानः शब्दस्य व्युत्पत्तिं कुरु ?

१३ प्राणः शब्दस्य भाष्यानुसारं व्याख्या विधीयताम् ?

१४ ऋतं च मेऽमृतं च व्याख्यां कुरु ?

१५ तत्वायामि मन्त्रे किं छन्दः कः द्रष्टेति स्पष्टयतु ?